International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(4): 130-132
© 2026 IJMH
www.themultijournal.com
Received: 15-07-2026
Accepted: 12-08-2026
Publish : 13-08-2026

**SUMAN SARKAR**
Research Scholar, Dept. of Sahitya,
National Sanskrit University,
Tirupati, Andhra Pradesh

**Correspondence:**
**SUMAN SARKAR**
Research Scholar, Dept. of Sahitya,
National Sanskrit University,
Tirupati, Andhra Pradesh

# नाट्यशास्त्रीयपरम्परायां श्रीरूपगोस्वामिनः नाटकचन्द्रिका

**SUMAN SARKAR**

**सारांशः**

शोधलेखेऽस्मिन् संस्कृतसाहित्यस्य विशालनाट्यशास्त्रीयपरम्परायां गौडीयवैष्णवसम्प्रदायस्य मूर्धन्याचार्यस्य श्रीरूपगोस्वामिनः **नाटकचन्द्रिका** इति ग्रन्थस्य, प्रयोजनं, स्थानं, महत्त्वं, सिद्धान्तपरिपाटी च यथाशास्त्रं विमृश्यते। आचार्यभरतमुनेः **नाट्यशास्त्रात्** आरब्धायामस्यां परम्परायां भक्तिरसाश्रितानां स्वविरचितनाटकानां (ललितमाधव-विदग्धमाधवादीनां) लक्षणसमन्वयाय रूपगोस्वामिना ग्रन्थोऽयं प्राणायि। पारम्परिकलक्षणग्रन्थवैलक्षण्यम्, आचार्यविश्वनाथमतवैपरीत्यं, भरतमुनिसिद्धान्तवैष्णविकृतिश्च ग्रन्थस्यास्य निरूपयितुं प्रकृतशोधलेखोऽयमुद्दिश्यते।

**कूटशब्दाः- नाट्यशास्त्रीयपरम्परा, वैष्णवनाटकम्, ललितमाधवम्, लक्षणम्**

**आमुखम्**

**सुररिपुसुदृशामुरजकोकान् मुखकमलानि च खेदन्नखण्डः।**
**चिरमखिलसुरश्चकोरनन्दी दिशतु मुकुन्दयशः शशी मुदं वः॥**[1]

संस्कृतसाहित्ये नाट्यशास्त्रस्य सुविस्तृता, सुविकसिता च परम्परा वर्तते। आचार्यभरतमुनेः नाट्यशास्त्रम् अस्याः परम्परायाः आधारशिला वर्तते। तदनन्तरं धनञ्जयस्य दशरूपकम्, रामचन्द्र-गुणचन्द्रयोः नाट्यदर्पणः, सागरनन्द्याः नाटकलक्षणरत्नकोशः, विश्वनाथस्य साहित्यदर्पणः इत्यादिषु प्रमुखेषु ग्रन्थेषु नाटकलक्षणानि सुष्ठुतया निरूपितानि। परन्तु षोडशशतके गौडीयवैष्णवसम्प्रदायस्य प्रवर्तकेष्वन्यतमेन श्रीरूपगोस्वामिना भक्तिरसमुत्सर्गीकृत्य काव्यनाट्यशास्त्रयोः नूतनमेव प्रस्थानं निर्मायि, यत्र परम्परागतैः मम्मट-अभिनवगुप्तादिभिराचार्यैः देवादिविषयकरतिः केवलं भाव इत्यङ्गीकृता, तत्र श्रीरूपगोस्वामिना सा एव भक्तिः रसराजत्वेन प्रतिष्ठापिता। तस्य भक्तिरसामृतसिन्धुः, उज्ज्वलनीलमणिश्च रसशास्त्रस्य अद्वितीयौ ग्रन्थौ स्तः। तयोः एव पूरकतया वैष्णवनाटकानां लक्षणनिरूपणाय तेन नाटकचन्द्रिकाख्यः लक्षणग्रन्थो व्यरचि।

**नाटकचन्द्रिकाग्रन्थस्य रचनाप्रयोजनम्**

श्रीरूपगोस्वामी महान् शास्त्रज्ञः नाट्यविदप्यासीत्। तेन विदग्धमाधवं, ललितमाधवं, दानकेलिकौमुदी(भाणिका) इत्यादिनि नाटकानि रचितानि। पम्परागतैः धनञ्जयविश्वनाथादिभिः प्रणीतैः लक्षणैः सह अस्य वैष्णवनाटकानां साकल्येन समन्वयः न भवति स्म। यतोहि तेषु नाटकेषु लौकिकशृङ्गार-वीररसयोः स्थाने मधुरभक्तिरसस्यैव प्राधान्यमासीत्। अतः स्वविरचितवैष्णवनाटकानां शास्त्रीयतामुपपादयितुं श्रीरुपगोस्वामी नाटकचन्द्रिकां रचयाम्बभूव। ग्रन्थारम्भे एव सः ग्रन्थस्यास्य प्रतिज्ञां, प्रयोजनञ्च निरूपयति।

**वीक्ष्य भरतमुनिशास्त्रं रसपूर्वसुधाकरञ्च रमणीयम्।**
**लक्षणमतिसङ्क्षेपाद्विलिख्यते नाटकस्येदम्॥**[2]
**नातीव सङ्गतत्त्वाद् भरतमुनेर्मतविरोधाच्च।**
**साहित्यदर्पणीया न गृहीता प्रक्रिया प्रायः॥**[3]

**ग्रन्थकर्तुः श्रीरूपगोस्वामिनः परिचयः**

वृन्दावनस्थगौडीयवैष्णवसम्प्रदायप्रवर्तकेषु षट्सु गोस्वामिष्वन्यतमश्चासीद् श्रीमद्रूपगोस्वामि-प्रभुपादः, तदग्रजः सनातनगोस्वाम्यपि। तावेतावास्तां श्रीगौरमहाप्रभोः चैतन्यस्य शिष्यौ समसामयिकावपि। एतयोरनुजस्य बल्लभस्यात्मजः जीवगोस्वामी अपि षट्सु गोस्वामिष्वन्यतमः। सनातनगोस्वामिप्रणीतस्य लघुभागवतामृतस्य स्वविरचितव्याख्यायां श्रीजीवगोस्वामिप्रभुपादैः स्ववंशस्यानुक्रमश्चाप्युल्लिखितः, यत्र च श्रीसनातनगोस्वामिप्रणीतानां श्रीरूपगोस्वामीप्रणीतानां ग्रन्थानां सूची च सम्प्रदत्ता वर्तते। वृन्दावननिवासिनामेतेषां त्रयाणां गोस्वामिपादानां जीवनादिवृत्तान्तं भक्तिरत्नादिग्रन्थेषु प्राप्यते। तदेतज्ज्ञायते यत् तेषां मूलपुरुषाः कर्णाटकब्राह्मणाः आसन्। ते परम्परायातं स्वप्रदेशं परित्यज्य बङ्गदेशे स्वावासं कल्पयाम्बभूवुः। कर्णाटके आसीत् राजकीयवंशपरम्परायां भारद्वाजगोत्रसर्वज्ञः जगद्गुरुर्नाम मूलपुरुष। तेनैव वंशानुक्रमेण रूपगोस्वामिनः पितामहः मुकुन्दः फतेयावादग्रामे स्वकीयावासं रचयाम्वभूव । मुकुन्दस्याभवदेक एव पुत्रः श्रीकुमारो नाम । श्रीकुमारस्य आसन् त्रयः पुत्राः, सनातनः, रूपः, बल्लभश्चेति। बल्लभस्यानुपम इति चासीन्नामान्तरमपि। श्रीरूपगोस्वामिनः ज्येष्ठभ्राता सनातनः नवद्वीपस्य विदुषः रत्नाकरवाचस्पतेः सकाशात् संस्कृतमध्यैत। सः गौडादेशाधिपस्य हुसेनशाहस्य यवनराजस्य सभायां महामन्त्रिपदमधिगत्य फतेयावादग्रामसमीपवर्तिनि रामकेलिग्रामे स्वानुजैः सहावासं परिकल्पयाम्बभूव। श्रीरूपगोस्वाम्यपि तस्यैव राजसभायां मन्त्रिपदमलञ्चकार। स्वभावेन धर्मप्रवृत्ताः इति ते गौडीयवैष्णवमहाप्रभोः श्रीचैतन्यस्य हृदयमाकृष्यन्। तस्य शिष्याः भवितुं ते गृहमत्यजन्। श्रीचैतन्यदेवप्रेरणयैव वृन्दावने निवसन्तः वैष्णवसिद्धान्तमूलकान् स्तोत्रगीतादिप्रवन्धान्, काव्यनाटकादिविविधरुपसमन्वितान् ग्रन्थान् विरचयामासुः। श्रीरूपगोस्वामिनः यथार्थजीवनकालः निश्चेतव्यश्चेत् -श्रीचैतन्यमहाप्रभोः समकालिकत्वात् तथा च श्रीजीवगोस्वामिनः विरचितायां लघुभागवतामृतव्याख्यायां स्ववंशनुक्रमणिकायाः परिशीलनेन ज्ञायते यत् १४९० तः १५५० वर्षाभ्यन्तरे श्रीरूपगोस्वामिनः साहित्यिकप्रवृत्तेः सर्वाधिकसमृद्धकालः इति।

**रूपगोस्वामिप्रणीताः ग्रन्थाः**

१)हंसदूतम् २)उद्धवसन्देशः ३)अष्टलीलाच्छन्दः ४)उत्कलिकावल्लरी ५)गोविन्दविरुदावली ६)प्रेमेन्दुसागरः ७)विदग्धमाधवम् ८)ललितमाधवम् ९)दानकेलिकौमुदी १०)भक्तिरसामृतसिन्धुः ११)उज्जलनीलमणिः १२) नाटकचन्द्रिका १३)पद्यावली १४)मथुरामहिमा १५)लघुभागवतामृतम् १६) आनन्दमहोदधिः १७)मुकुन्दमुक्तावली

**नाट्यशास्त्रीयपरम्परायां नाटकचन्द्रिकायाः स्थानम्**

श्रीमद्रूपगोस्वामिपादैः प्रणीतग्रन्थेषु नाट्यशास्त्रसम्बद्धाः त्रयो ग्रन्थाः विराजन्ते — विदग्धमाधवम्, ललितमाधवम्, दानकेलिकौमुदी च। प्राचीनेषु नाट्यग्रन्थेषु श्रीहर्षप्रणीता रत्नावली नाट्यशास्त्रस्य सम्पूर्णलक्षणैः समन्विता वर्तते। अत एव साहित्यदर्पणे कविराजविश्वनाथः नाटकप्रकरणे षष्ठपरिच्छेदे प्रायः सर्वाणि उदाहरणानि रत्नावलीतः एव उज्जहार। अस्माकं वैष्णवकाव्येषु ललितमाधवम् अपि तादृशमेव, नाम अत्र नाटकस्य समग्रलक्षणानि समुल्लसन्ति। एतैरेव कारणैः ग्रन्थकारः केवलं ललितमाधवनाटकं विरचय्य न विरराम, प्रत्युत तत्रत्य लक्ष्यैः सह समन्वयनाय तेन पृथक्तया नाटकलक्षणग्रन्थः नाटकचन्द्रिकानाम्ना प्रणीतः। अस्यां प्रत्येकं लक्षणस्य उदाहरणं ललितमाधवतः एव समुद्धृतम्। विदग्धमाधव-रसार्णवसुधाकर-कंसवध-वीरचरित-हरिविलास-केशवचरितनामकग्रन्थेभ्योऽपि उदाहरणानि अतीव स्वल्पानि गृहीतानि। नाटकचन्द्रिकायां केवलं नाटकस्य विषयाः एव समुल्लिखिताः। तेन हि वैष्णवसाहित्यजगति नाट्यालङ्कारशास्त्रसरण्याः अभावः पूर्णतया दूरीकृतः। अतः नाट्याङ्गानां सविस्तरं निरूपणं, तथा च स्वविरचितस्य ललितमाधवनाटकस्य सम्यक् परिपुष्टिसाधनमेव नाटकचन्द्रिका-प्रणयनस्य मुख्यमुद्देश्यमिति सविशेषमनुमीयते।

**प्रस्तुतग्रन्थस्य प्रतिपाद्यविषयाः**

ग्रन्थोऽयं संस्कृतनाट्यशास्त्रपरम्परायां विशेषतः भक्तिराश्रितकाव्यानां क्षेत्रे महियान् वर्तते। वैष्णवनाटकेषु श्रीकृष्णस्य लीलामहिमानः वर्णितास्सन्ति। तेषां शास्त्रीयलक्षणनिर्धारणाय एव नाटकचन्द्रिकायाः रचना सञ्जाता। नाटकचन्द्रिकायां नाट्यशास्त्रस्य पारम्परिकतत्त्वानां वैष्णवदर्शनस्य च अपूर्वः समन्वयः दरीदृश्यते। ग्रन्थेऽस्मिन् नाटकलक्षणं, नायकः, रसः, इतिवृत्तं, प्रस्तावना, नान्दी, पञ्चावस्थाः, सन्धयः, सन्ध्याङ्गानि, सन्ध्यान्तराणि, विभूषणानि, पताकास्थानानि, अर्थोपक्षेपकाः, भाषाविधानं वृत्तयः चेत्येते विषयाः प्रतिपादिताः सन्ति। श्रीरूपगोस्वामिपादः ग्रन्थारम्भे एव ग्रन्थप्रतिज्ञां कृत्वा नाटकलक्षणं कथयति –

**दिव्येन दिव्यादिव्येन तथा दिव्येन वा युतम्।**
**धीरेणाढ्यमुदात्तेन कृष्णश्चेल्ललितेन च।।**[4]
**शृङ्गारवीरान्यतरमुख्यं रम्येतिवृत्तयुक्।**
**प्रस्तावनान्तसम्वन्धं सन्धिसन्ध्यङ्गसङ्गतम्।।**[5]
**सन्ध्यन्तरैकविंशत्या षट्त्रिंशद्भूषणैर्युतम्।**
**पताकास्थानकैर्युक्तमर्थोपक्षेकैस्तथा।।**[6]
**भाषाविधानसंयुक्तं सत्काव्यगुणगर्भितम्।**
**नाटकं दोषरहितं सर्वानन्दप्रदायकम्।।**[7]

नाटके के नायकाः भवेयुः? इति प्रश्ने सति श्रीरूपगोस्वामिना दिव्यादिव्य-दिव्य-अदिव्यादिभेदेन नायकप्रकाराः उपन्यस्ताः। ग्रन्थकारः श्रीरूपगोस्वामी सिंहभूपालविरचित-रसार्णवसुधाकरे वर्णितान् अष्टौ रसान् एव स्वीकृतवान्।

**रसाः शृङ्गारवीराढ्या ज्ञेया रससुधार्णवे।**
**अन्ये हास्यादयः कार्या अस्मिन्नङ्गतया बुधैः।।**[8]

श्रीरूपगोस्वामी इतिवृत्तस्य भेदत्रयमनुत, यथा ख्यातं, क्लृप्तं, मिश्रं च। अस्य मतानुसारं नाटके ख्यातवृत्तं, नाटिकायां क्लृप्तं, ईहामृगे मिश्रवृत्तं च भवति। नाटकस्य मुख्यमङ्गं भवति अर्थप्रकृतिः। अयम् अर्थप्रकृतिः पञ्चविधमङ्गीकरोति। यथा-

**पाञ्चविध्यात् कथायास्तु प्रकृतिः पञ्चधा स्मृता।**
**बीजं बिन्दुः पताका च प्रकरी कार्यमेव च।।**[9]

**बीजस्य लक्षणं यथा-**

**यत्तु स्वल्पमुपक्षिप्तं बहुधा विस्तृतिं गतम्।**
**कार्यस्य कारणं धीरैस्तद्बीजमिति कथ्यते।।**[10]

अर्थात् नाटकस्यारम्भे यत् स्वल्परूपं भवति तदेव अन्तिमे गत्वा विस्ताररूपतां धत्ते तदेव बीजमित्युच्यते। यथोदाहरणं ललित-माधवे- प्रथमद्वितीयतरङ्गयोः राधामाधवयोः अनुरागः। एवमेव लक्षणं विधाय ललितमाधवनाटकादेव अर्थप्रकृतीनाम् उदाहरणानि संगृहीतानि।

**अवस्थायाः विषये तेनैवोक्तम्-**

**कार्यस्य पञ्चधाऽवस्था नायकादिक्रियावशात्।**
**आरम्भ-यत्न-प्राप्त्याशा-नियताप्ति-फलागमाः।।**[11]

**आरम्भस्य लक्षणं –**

**बुधैर्मुख्यफलोद्योगम् आरम्भ इति कथ्यते।**[12]

यथोदाहरणम्-ललितमाधवे मुखसन्धौ राधामाधवयोरन्योन्यस-ङ्गमाय व्यवसायारम्भः। एवमेव क्रमानुसारं यत्न-प्राप्त्याशा— नियताप्ति-फलागमानां लक्षणानि निरूप्य ललितमाधवात् उदाहरणानि उद्धृतानि। सन्धिसन्ध्यङ्गानां, सन्ध्यन्तराणां, विभूषणानां, अर्थोक्षेपकानां, पताकास्थानानां, भाषाविधानानां, वृत्तीनां च लक्षणोदाहरणानि क्रमेण वर्णितानि सन्ति।

**उपसंहारः**

संक्षेपतः वक्तुं शक्यते यत्, संस्कृतनाट्यशास्त्रीयपरम्परायां श्रीरूपगोस्वामिनः नाटकचन्द्रिका केवलं प्राचीनग्रन्थानाम् अनुकरणं नास्ति, अपितु गौडीयवैष्णवदर्शनस्य, रसतत्त्वस्य च नाट्यशास्त्रेण सह अपूर्वसङ्गमः अस्ति। यत्र भरतमुनेः नाट्यशास्त्रं लौकिकनाटकानां कृते मार्गदर्शकमस्ति, तथैव नाटकचन्द्रिका भगवतः श्रीकृष्णस्य दिव्याप्रकृतलीलानां नाट्यरूपाभिव्यक्तेः शास्त्रीयनिदर्शनः वर्तते। वैष्णवनाट्यपरम्परायाः अध्ययनाय अयमेकः अनिवार्यः अद्वितीयश्च ग्रन्थः वर्तते।

**परिशीलितग्रन्थसूची**


1) गोस्वामी श्रीरूपः, *"नाटकचन्द्रिका* -व्याख्या. सम्पा. च -प्रो. श्रीबाबूलाल शुक्लः शास्त्री" चौखम्बा संस्कृत सीरिज ऑफिस – वाराणसी, प्रकाश हिन्दीव्याख्योपेता -प्रथमसंस्करणम्, 1964

2) गोस्वामी श्रीरूपः, *"नाटकचन्द्रिका"* – श्रीरासविहारी साङ्खतीर्थ काशीमवाजार, -1313(बङ्गाद्बः) -प्रथमसंस्करणम्

3) गोस्वामी श्रीरूपः, *"ललितमाधवम्* सम्पा. अनुवादकश्च -प्रो. बाबूलाल शुक्लः शास्त्री" चौखम्बा प्रकाशन, वाराणसी, -2010 नारायणप्रणीतया टीकया समुपेतम्-द्वितीयसंस्करणम्

4) दाहालः आचार्यलोकमणि, *"संस्कृतसाहित्यतिहासः"* चौखम्बा कृष्णदास अकादेमी , वाराणसी, -2019 पञ्चमसंस्करणम्

5) उपाध्यायः बलदेवः, *"भारतीय साहित्य शास्त्र"*, नन्दकिशोर एण्ड सन्स, चौक वाराणसी 1963(प्रथमखण्डः) द्वितीयसंस्करणम्

6) भरतमुनिः, *"नाट्यशास्त्रम्"* डाँ रूपनारायाण त्रिपाठी, आचार्य गुरुप्रसाद गौड,हंसा प्रकाशन, जयपुर 2019 , हिन्दी-संस्कृत-व्याख्योपेता


**पाद टिप्पणी -**

1. ललितमाधवम् १.१
2. नाटकचन्द्रिका १
3. नाटकचन्द्रिका २
4. नाटकचन्द्रिका ३
5. नाटकचन्द्रिका ४
6. नाटकचन्द्रिका ५
7. नाटकचन्द्रिका ६
8. नाटकचन्द्रिका ११
9. नाटकचन्द्रिका ३१
10. नाटकचन्द्रिका ३२
11. नाटकचन्द्रिका ४१
12. नाटकचन्द्रिका ४२